योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ०८

अज्ञातलेखकः

अष्टमः सर्गः ८

श्रीवसिष्ठ उवाच ।

इति चित्तविलासेन चिरमुत्प्रेक्षितैः प्रियैः ।

प्रणयैर्भार्गवस्यासीत्तुष्टये सुसमागमः ।। १

मन्दारमालाकलया विबुधासवमत्तया ।

तदा तेन तया सार्धं द्वितीयेनामलेन्दुना ।। २

विहृतं मत्तहंसासु हेमपङ्कजिनीषु च ।

तटीष्वमरवाहिन्याः सह चारणकिंनरैः ।। ३

पीतमिन्दुदलस्यन्दैर्देवैः सह रसायनम् ।

पारिजातलताजालनिलयेषु विलासिना ।। ४

चारुचैत्ररथोद्यानलतालोलासुदोलया ।

चिरं विलसितं व्यग्रैः सह विद्याधरीगणैः ।। ५

नन्दनोपवनाभोगो मन्दरेणेव वारिधिः ।

भृशमालोड्यतां नीतः प्रथमैः सह शाम्भवैः ।। ६

बालहेमलताजालजटालासु नदीषु च ।

भ्रान्तमुन्मत्तनागेन मैरवीष्वब्जिनीष्विव ।। ७

कैलासवनकुञ्जेषु तया सह विलासिना ।

हरेन्दुधवला रात्र्यः क्षिपिता गणगीतिभिः ।। ८

गन्धमादनशैलस्य विश्रम्योपरि सानुषु ।
सा तेन कनकाम्भोजैरापादमभिमण्डिता ।। ९
लोकालोकतटान्तेषु विचित्राश्चर्यहारिषु ।
क्रीडितं कृतहासेन राम तेन तया सह ।। १०
मन्दरान्तरकच्छेषु सार्धं हरिणशावकैः ।
अवसत्स समाः षष्टिं कल्पितामरमन्दिरे ।। ११
क्षीरार्णवतटीष्वस्य वनितासहचारिणः ।
क्षीणं कृतयुगादर्धं श्वेतद्वीपजनैः सह ।। १२
गन्धर्वनगरोद्यानलीलाविरचनैरसौ ।
स्रष्टानन्तजगत्सृष्टेः कालस्यानुकृतिं गतः ।। १३
अथावसदसौ शुक्रः पुरन्दरपुरे पुनः ।
सुखं चतुर्युगान्यष्टौ हरिणेक्षणया सह ।। १४
पुण्यक्षयानुसंधानात्ततश्चावनिमण्डले ।
तयैव सह मानिन्या पपातोपहताकृतिः ।। १५
परालूनसमस्ताङ्गो हृतस्यन्दननन्दनः ।
चिन्तापरवशो ध्वस्तः समितीव हतो भटः ।। १६
पतितस्यावनौ तस्य चिन्तया सह दीर्घया ।
शरीरं शतधा जातं शिलापातीव निर्झरः ।। १७
संशीर्णयोर्देहकयोश्चित्तके व्यसनाविले ।
विचेरतुस्तयोर्व्योम्नि निर्नीडौ विहगौ यथा ।। १८
तत्राविविशतुश्चान्द्रं ते चित्ते रश्मिजालकम् ।
प्रालेयतामुपेत्याशु शालितामथ जग्मतुः ।। १९
शालींस्तान्भुक्तवान्पक्वान्दशार्णेषु द्विजोत्तमः ।
स शुक्रः शुक्रतामेत्य तद्भार्यातनयोऽभवत् ।। २०
ततो मुनीनां संसर्गात्तपस्युग्रे व्यवस्थितः ।
अवसन्मेरुगहने मन्वन्तरमनिन्दितः ।। २१

तत्र तस्य समुत्पन्नो मृग्याः पुत्रो नराकृतिः ।
तत्स्नेहेन परं मोहं पुनरप्यcraft्यायौ क्षणात् ।। २२
पुत्रस्यास्य धनं मेऽस्तु गुणाश्चायुश्च शाश्वतम् ।
इत्यनारतचिन्ताभिर्जहौ सत्यामवस्थितिम् ।। २३
धर्मचिन्तापरिभ्रंशात्पुत्रार्थं भोगचिन्तया ।
क्षीणायुषं तमहरन्मृत्युः सर्प इवानिलम् ।। २४
भोगैकचिन्तया सार्धं सममुत्क्रान्तचेतनः ।
प्राप्य मद्रेशपुत्रत्वमासीन्मद्रमहीपतिः ।। २५
मद्रदेशे चिरं कृत्वा राज्यमुत्सन्नशात्रवम् ।
जरामभ्याजगामात्र हिमाशनिरिवाम्बुजम् ।। २६
मद्रराजतनुं चारुं तपोवासनया सह ।
तत्याज तेन जातोऽसौ तपस्वी तापसात्मजः ।। २७
समङ्गाया महानद्यास्तटमासाद्य तापसः ।
तपस्तेपे महाबुद्धिः स राम विगतज्वरः ।। २८
विविधजन्मदशां विविधाशयः
समनुभूय शरीरपरम्पराः ।
सुखमतिष्ठदसौ भृगुनन्दनो
वरनदीसुतटे दृढवृक्षवत् ।। २९

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० मो० स्थितिप्रकरणे भार्गवोपाख्याने शुक्रविविधजन्मानुभवो नामाष्टमः सर्गः ।।
८ ।।